This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M651 विषय व्याकरण

नाव. कात्यायन सूत्रे पंचमोऽध्याय. M85 ✓

लेखक/लिपीकार – (प्रथमपृष्ठ गहाळ)

पृष्ठ 35 काळ – पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिष्टहोमाः स्वाहाकारप्रदाना जुहोतयो ब्राह्मणाः ऋत्विजो नक्षत्रप्रतिषेधादितरयोर्द
र्शनाद्यफलयुक्तानामारंभे यथाकामी फलार्थित्वान्ननियमेनिमित्ताग्निहोत्रदर्शपूर्ण
मासदाक्षायणाग्रयणपशुषु प्रवृत्तेः सोमे चैके चातुर्मास्येषु चतुर्मुखश्रुतेर्नियतत्वसह
पाठाद्दर्शनाद्यैनोत्सर्गयोगात्स्यात्त्रिह्नः शब्दादि गुणे फलनिवृत्तिरङ्गप्रधानभेदात्प्रा
यश्चित्तविधानाच्च न याचदृष्टन्ने श्रुतिलक्षणत्वात्प्रायश्चित्ते न तत्कालं दृष्टेत्तत्परिमा
णं ॥२॥ ऋचो यजूंषि सामानि निगदा मन्त्रास्तेषां वाक्यं निराकांक्षं मिथः संबद्धं तेषाम्
मा [illegible] न स्यात् न ह्रचनत्वान्मन्त्रान्तैः कर्मादिः सान्निपात्यैर्निधानादनियमं वा
[illegible] त्स्यः आदिन्त्वाचार्यास्त आयुक्ताः परादिना पर्वान्तः उपांशु प्रयोगः श्रुतेर्न संप्रै
षाः कौशं बर्हिरर्थात्परिमाणमयुग्मात्तु नियूनानि प्रागग्रे पूनउदगग्रे बर्हि राचिनो प
न्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रुदगग्रे प्रागग्रमिध्मं प्रसग्नं थीनवमूहत्यष्टादशेध्मं परिधिवक्ष्याणामेकविंशः श
तिं वा ततः परिधीनेके परिमितं प्रणयनीयं त्रिवृतं निरूप्या ज्यं वेदो सीति यजमानो वे
दङ्कुरोति कुशमुष्टिः सव्यावृत्तं वत्स जानुं त्रिवृतं मन्तकार्यं वापशु ब्रह्मवर्चसं नार
घ्नकामाय थासंख्यमानुष्ठानादिति कर्मसु तन्त्रोन्तवचनेन च प्रतिकर्मोद्धरणमप्रसङ्गे
पवृत्तकर्मा लौकिको र्थसंयोगाद् प्रकरणोत्पत्तिरनारभ्यवाद न्या अपित्वात् सर्वंगु
ण प्रकरणे चाविशेषाद्दर्शनाच्चैवं कंकतानि पात्राणि खादिरः स्रुवः स्फ्यश्च पाशीजु
हूराश्वत्थ्युपभृद्धारणान्य होमसंसुक्तानि बाहुमात्र्यः स्रुचः पाणिमात्र पुष्करास्त्वग्बि
लाहंसमुखप्रसेका मूलदंडा भवंत्यरत्निमात्रः स्रुवोंगुष्ठपर्ववत्पुष्करस्फ्योस्याकृ
तिरादर्शाकृतिप्राशित्रहरणं चमसाकृतिवाचात्वालोत्करावंतरेण संचरः प्रणीतो
॥२॥

त्कराविष्टिषु ॥३॥ चोदिताभावेनारंभस्तत्सिद्धित्वात्तस्य नियते सामान्यतः प्रति
धिस्यादारंभान्त्रिपमोदोषश्चासमात्योस्यात्सामान्याद्दर्शनाच्चान्यार्थदर्शनं न पु
नर्ग्रहणं व्रते प्रसङ्गो न नियमशब्दाच्छब्दे विप्रतिपत्तिः सोमेन जास्यनावादाज्ये चाद
र्शनात्स्पर्शो मंत्रवर्णाच्छ्रुतेश्च विकल्पे प्रवृत्तं कर्मान्तरत्वात्प्रतिनिधौ तत्कालादर्थद्र
व्यविरोधे र्थसामान्यं तत्स्वरत्वाद्गुणद्रव्ययोर्द्रव्यं प्रधानयोगान्नसमत्वाद्गुणानु
ग्रहात् ॥४॥ कर्मणामानुपूर्व्यं न्तयुगपद्भावादर्थनिर्वृत्तेश्चस्याद्वानुपूर्व्यनियमः श्रु
त्यर्थक्रमेभ्यः प्राकृतं च विकृतौ विरोधे र्थस्तत्परत्वाच्छ्रुतिक्रमाद्वानुमानिकत्वान्मंत्र
चोदनयोर्मन्त्रबलं प्रयोगित्वान्नसमत्वाद्गुणानान्तु न्यये त्वात्तुल्यसमवाये सामान्य
पूर्वमानुपूर्व्ययोगान्नैककर्मणि संबन्धाद्ग्रहणसादनावदानप्रदानेषु तु वचनान्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यभेदे गुणयोगादिति वा स्याः प्रयत्नेनियतंदोषविशेषात् षोडशिनित्यानुपूर्व्यं भू
यस्त्वादनियमः फलसंयुक्तेषु क्रमाविध्यर्थः कर्मण्यसंभवात् ॥५॥ अवत्तनाशेन्य
द्गुणानुग्रहान्तपूर्वशेषादचोदितत्वाच्च स्विष्टकृद्वदानुपूर्व्ययोगाद्गुणहानौ तु शेष
नाद्यान्तदेवताग्निशब्दक्रियापरार्थत्वात्कामन्देवतां प्रतिषिद्धं प्रस्यवायात्स्वामीफ
लयोगाद्गुणेषु प्रतिनिधिः परार्थत्वात्तत्रेषु तु श्रुतेः सतद्धर्मा कर्मयोगात्स्त्राणि
ब्राह्मणानाम् लिङ्ग श्रुतेरेककल्पानामवैगुण्यान्तपरार्थत्वाद्वैश्यराजन्ययोर्गार्ह
पतेसहस्रेसंवत्सरममनुष्याणामसंभवात्स्याद्दहानिस्यत्वान्तस्य च कार्यत्वान्नेस
म्नवाध्यात्सत्रसमन्वयादिति भारद्वाजोनादर्शनात्कुलसत्रमितिकार्ष्णाजिनिः सर्वेन्यु
त्थानमितिलौक्षिरन्हांवा शक्यत्वाच्छ्रुतिसामर्थ्यात्प्रकृत्यनुग्रहात्स्यात् ॥६॥ कर्मणां युग
॥२॥

द्वावस्तंत्रः शाक्यपुरुषार्थकर्तृत्वैकार्यसमवायश्रुतिभ्यः फलकर्मदेशकालद्रव्यदेव
तागुणसामान्येनतद्भेदे भेदोदेशकालौ विशेषेनकर्तृत्वोपदेशादहर्गणेऽसुब्रह्मण्यायास्
सर्वोपलक्षणं प्रकृतिवत्तन्त्रकालकर्मप्रत्यहमविधानादेकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रव
चनङ्कृतत्वान्तग्रहणलवनस्तरणाज्यग्रहणेषु तु वचनाद्राज्ये मुष्टौ चोत्तमेस्यान्नदी
तरणाववर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वान्तानियमित्तनेदोप्रधा
नकालः सकृदसन्निपातात्पुपःस्वरुःसः स्थावचनात्तंनिर्वर्त्तेश्चकर्मणि पुरुषार
णां प्रधानः स्वामीफलयोगात्पुरुषप्रयोगिमंत्रसंस्कारयोस्त्यागे सामर्थ्याद्वचनादन्य
च्छेषमितरे ममप्रासव्यमुपवीतिनः प्रांच्युदग्वावृत्तिसामंतेषु प्रदक्षिणं विपर्यस्यापि
त्र्येषु तु सकृद्दक्षिणा च प्रधानद्रव्यव्यापन्नौ साङ्गावृत्तिस्तद्दोदेशात् ॥७॥ गुणानामेका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थानाह्ः सर्वार्थं न श्चोदितत्वान्नकृतत्वादनारभ्यात्वाद्दर्शनाच्च श्रुत्यानर्थक्यमिति
चेत्फलान्तरेर्थवत्त्वह्ः स्याद्धर्ममात्रेषु समुच्चयोविरोधेहोत्राध्वानयोर्न्यायाज्यानु
वाक्यासुविरोधाद्दर्शनाच्च प्रायश्चित्तेषु दोषनाशान्नाश्रुतेः प्रत्यक्षाच्चत्स्याद्धादर्शना
न्नान्यार्थत्वान्मंत्रस्वरक्रियाययथाम्नातन्नविशेषाद्भाषिकस्वरोवोपपन्नमंत्रोपदे
शात्तानोवानित्यत्वादेकश्रुतिहूरात्संबुद्धौयज्ञकर्मणिस्तुब्रह्मण्यासामजपन्यूंख
याजमानवर्जंः संख्याविकल्पोदानसंयोगेकृतत्वाद्वध्यवसाध्यूध्नीवनिष्वपुस
मुच्चयोद्रव्यसंस्कारतद्धेशाभ्यांचोदनागुणेषुचप्रकृत्सवंधाभ्याद्भार्हपत्याहवनीयो
नव्यवेयाद्विवत्स्याच्चस्यचेतरथारत्निरतीत्यनिष्क्रमणमुत्तरतउपचारोयज्ञोदक्षि
णतोब्रह्मयजमानयोरासनेपश्चाद्यजमानोवेदिस्पृगध्वर्युःकर्मसुवेदयोगाद्धच ॥६॥

नविरोधाभ्यामन्योहविष्मात्रस्याम्नतिजांपूर्वंपूर्वमन्तरमन्तिजांचयथापूर्वंनवा
चोदितत्वाद्धार्हपत्येसंस्काराः श्रपणंवाहवनीयेघृतमाज्येलिंगात्तस्यहोमोनादेशे
चोत्त्वोत्लात्सुरीषमाहवनीययजतयोध्रुवायाः इडाप्राशित्राघारैविदिशावेकअ
वनीयेहोमाः श्रुतिसमाख्यानाभ्यांजुह्वावचनेसत्कृहीनाथाप्रेरवषट्कारात्तिरेव
च॥८॥ ब्रीहीन्यवान्वाहविषितस्यद्विरवघृतित्रिर्जमदग्नीनांपश्चात्तृतीयंःस
र्वेषांवोनयमविधानान्मध्यात्पूर्वार्धाच्चासंभिदन्त्रंगुष्टपर्वमात्रमवदानमात्रावद्द
धिपयसोराघंतयोराज्यमेकप्रस्तवायंः स्विष्टकृतोद्विश्चाभिघारणमवदायप्रत्यय
भिघारणप्राक्स्विष्टकृतः सर्वहुतएककपालोनुवाचनप्रैषोयथादेवतममनुष्माअनु
ब्रूहीत्याश्राव्यप्रेषचामुंयजतिप्रैषानुवाचनेषष्ठीवपायैधानासोमेभ्यइतिपरिहा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यासाविस्यपनोदे सवषट्कारास्रुतिष्ठं दक्षिणत उदङ्ङ्गुष्ठ हूते[illegible]ः सहवो भयतआज्य
६ हविषः सहवा॥९॥ वर्तमानोपदेशाच्चोदनाशब्दाछ्छुत्यर्थाभावात्सर्वे चेति वचनान्निर्दे
शात्कर्मचोदको मन्त्रो वा समभिव्याहारादर्थप्रसंख्ययाद्व्योपकल्पनं च मर्ण्युत्तरलोमा
नि प्राग्ग्रीवाण्येव रोहमुत्तर ३ं हविष्येकद्रव्ये साज्ये वेदेनोपग्रहण ६ स्फ्येनान्यत्रकु
शैरसत्सुपाणिभ्यां जुहूं परिगृह्योप भत्या धानामादानकाले स ३ं ह्राद यन्त्वा च्यफलेषु स्व
र्गःसामर्थ्यादेककर्मणि गुणविशेषफलविशेषो दानवाचनान्वारंभवर्णेर वरणप्र
प्रमाणेषु यजमानं प्रतीयात्स्वातल्लूनछिन्नावहतपिष्टदुग्धदग्धेषु यजुःक्रियासंभव
द्रोह३ं राक्षसमासुरमाभिचारणिकं मंत्रमुक्त्वापि त्वमात्मानं चालभ्योपस्पृशेद्पउप
स्पृशेदपः॥१०॥ इति कात्यायनसूत्रे प्रथमोध्यायः॥१॥ पूर्वां पौर्णमासीमुत्तरां वोपवसेत
॥१॥

पूर्वां पौर्णमासीमुत्तरां वोपवसेदग्न्यन्वाधानमध्वर्युर्यजमानो वा ममाग्ने वर्चो विहवे
ष्वस्तु वयं त्वेंधानास्तन्वं पुषेम॥ मह्यन्नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना
जयेमेत्याहवनीये समिधमादधाति तूष्णीमित्रीतयामेवमितरयोरग्न्योर्महाव्याहृ
तिभिर्वा प्राक्प्रह६ स्थन्त्रक्ष्णीं वाय यापूर्वमहनि माह६ सं मे थुनेवर्जर्तके शश्मश्रुवपनेवा
शिखमपराह्णे व्रतोपायनीयमश्नीतः सर्पिषा सुहितावंतरेणापराग्नी गत्वापरेणाहव
नीयं प्राङ्तिष्ठन्नग्निमीक्षमाणो पउपस्पृश्य व्रतमुपैमि अग्ने व्रतपते इदमहमिति वा सत्सवा
ग्यतः कर्मागमुत्तरेरस्य वदनं वृक्षारण्यौषधीनामश्नीयाद्वाहवनीयगृहे शाय्यधोगा
र्हपत्यस्य वा स घोषा प्रातरग्निहोत्र६ं हुत्वा ब्रह्माणं वृणीते ब्रह्मन्निष्ठं भूपते भुवनप
ते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमह इति वृतो जपत्यहं भूपतिरहं भुवनपति
।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देव सवितरेतन्त्वा वृणते बृहस्पतिं ब्रह्माणं तदहं मन
से प्रब्रवीमि मनो गायत्रं गायत्री त्रिष्टुभे त्रिष्टुप् जगत्यै जगत्यनुष्टुभे नुष्टुप् प्रजापतये
प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्मा हं मनुष्याणामिति वाचस्पते यज्ञं
गोपाय स्वाहा परेणाहवनीयं दक्षिणातिक्राम स्वेहि दे धिषण्योदन्त स्तिष्ठान्यस्य सदने
सीद यो स्मत्पाकतर इति ब्रह्मसदनमीक्षते ब्रह्मसदनात्तृणं निरस्यति निरस्तः पाप्मा
सहतेन येद्विष्म इतीदमहं बृहस्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा तदग्नये प्रब्र
वीमि तद्वायवे तत्पृथिव्या इति॥५॥ ब्रह्मसदन आहवनीयमभिमुख उपविशति या
ग्यत आनुयाज प्रसवाद्भाग परिहरणाद्वा वतावषट्कारस्य त्रवा ब्रतोपायनं व्या
हृत्यैवैतत्त्वमन्त्रं जपेदध्वर्युश्च प्रणय यज्ञं देवतावर्द्धय त्वन्नाकस्य पृष्ठे यजमानोऽत्र ॥६॥

॥५॥

रस्तु॥ सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्योँ प्रणयेति प्रणीताः
प्रसौ स्येवमामंत्रित ॐकारेण प्रोक्षय यज्ञमिति हविषी धामाबर्हिषो श्च बृहस्पते परिगृ
हाण वेदिं स्रुगा वो देवाः सदनानि सं त्वस्यां बर्हिः प्रथतां स्साध्वं नर्हिः स्साप्पृथिवी
देवी देव्यस्त्विति वेदिं परिगृह्णं तं प्रजापतेनु ब्रूहि यज्ञमिति सामिधेनीरनुवक्ष्यं तं देव
तावर्द्धय त्वमिति सर्वत्रानुषजति मित्रस्य त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्षते देव
स्य त्वेति प्रतिगृह्णाति पृथिव्यास्त्वेति सादयत्यपोह्य बर्हिषि पुनरादाय देवस्य त्वेत्यना
मिकांगुष्ठाभ्यामग्नेष्ट्वेति प्राश्नाति दन्तैरनुपस्पृशन्न त्वं चनिर्दधामि वाः स्सं देशे प्रक्षा
ल्य पात्रं नाभिमालभन्ते या अप्स्वन्तर्देवतास्ता इदं शमयन्तु स्वाहा कृतं जठरमिन्द्र
स्य गच्छ घस्विनाभिमा सं पृक्थाउर्ध्वम्नेनाभेः सीदेन्द्रस्य त्वा जठरे सादयामीत्येतं त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिसमिदामन्त्रितःप्रसौतिप्रतिष्ठितिब्रूयाद्धाकर्मापवर्गेसमिधमादधातिजुहोस्युप
तिष्ठतेवानमःकृतायकर्मणेअकृतायकर्मणेनमः॥अयाड्यत्वंजातवेदाअंतरः
पूर्वो स्मिन्निषद्य॥सन्च६सनि६सुविमुचाविमुंचधेह्यस्मभ्यन्द्रविणजातवेदस्वा
हेतियथेतमेत्यैतद्धस्मत्वमिष्टिपश्चाः॥२॥गार्हपत्यमुत्तरेणोदपात्रंनिधायालभंते
मृतस्त्वामृतकरिष्यामीतिब्रह्मन्नपःप्रणेष्यामियजमानवाचंयच्छेत्स्वाहानुज्ञात
ऽउत्तरेणाहवनीयं६संप्रतिनिदधातिकस्त्वेतिनान्तरेणगच्छेयुःकाँस्यवानस्य
स्वमार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामाययथासंख्यंतृणैरग्नीन्परिस्तीर्यपु
रस्तात्प्रथमन्द्विशःपात्राणिसह६सादयतियजमानोवाशूर्पाग्निहोत्रहवणीस्फ्यः
कपाल६शम्याकृष्णाजिनमुलूखलमुसलंदृषदुपलमथैवचअपणस्यपश्चादुत्त ॥१०॥

रतोवाकर्मणेवामितिभूपाग्निहोत्रहवण्यादायवाचंयच्छतिप्रतपनंप्रत्युष्टन्निष्टस
मितिवागच्छत्युर्वन्तरिक्षमितिअपणस्यपश्चादनस्तिदृत्सामिङ्गिध्रुरसीतिध्रुरमिम
र्शनन्देवानामित्युपस्तंभनस्यपश्चादीषांविस्तुत्स्वसारोहणंप्रेक्षतउरुवातायेतिह
विष्पानपहतमितिनिरस्यस्तन्यद्दविद्यमानेनिमृशेद्यच्छंतामिस्यालमतंदेवस्य
त्वेतिगृह्णातिअग्नेयंचतुरोमुष्टीनेवमग्नीषोमीयंयथादेवतमन्यदूतायत्वेतिशेषा
निमर्शनं६स्वरितिप्राङ्क्षीक्षतेदृँहन्तामिस्वरोहतिगच्छत्युर्वन्तरिक्षमितिअप
णस्यपश्चात्सादयतिपृथिव्यास्त्वेतिपात्र्यांवास्कोपहितायाम्भूरिपारोहणानिपात्रीबि
लेजपतिदृ६हन्तामिस्तुत्यानंकुशैःसमावप्रशीर्णाग्रावनंनगर्नौकुशेश्छिन्नत्तिपवि
त्रेस्थइतित्रीन्वाहविर्गृह्णामपःकृत्वानान्यामुत्सुनातिसवितुर्वइतितास्थानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोः सव्येकृत्स्नाद्दक्षिणेनोदिङ्गतिदेवीराप इति प्रोक्षितास्थेति तासां प्रोक्षणैः हविश्चागत
ये त्वाग्नीषोमाभ्यां त्वेति यथादेवतमन्यत्पात्राणि दैव्यायेत्विसंचरे प्रोक्षणीर्निधाय ॥२॥
शर्मासीति कृष्णाजिनादानमपेत्य पात्रेभ्योवधुनोत्यवधूतमिति प्रत्यग्ग्रीवमास्तृणा
त्यदित्यास्त्वगिति सव्याश्रन्येनिदधात्युलूखलमद्रिरसि ग्रावासीति वा प्रतित्वेत्युन
योर्हविरावपत्यग्नेस्तनूरिति वाचं विसृजते यजमानश्च हविष्कृतावानानाबीजेष्वन्त्ये
सामर्थ्याद्बृहद्ग्रावेति मुसलमादत्ते सइदमित्यवदधाति हविष्कृदेहीति त्रिराहूय सततः प
त्यवहंत्यन्योवाहूय साहन्संन्योहृषदुपले कुक्कुटोसीति त्रिःशम्यया हृदिं दृषदं सकृदु
पलां वर्षवृद्धमसीति शूर्पमादत्ते प्रतित्वेति हविरुद्धपति परापूतमिति निष्पुनात्यपह
तमिति तुषान्निरस्यति वायुर्वः इति विविनक्ति देवोवइति पात्र्यामोप्यान्निमन्त्रयते त्रिः ॥८॥

फलीकरोतिदेवेभ्यः शुंधध्वं देवेभ्यः शुंधध्वमित्येके फलीकृत्य कणान्निदधाति पेषणो
पधानेयुगपद्दृषिरसी सुपर्वेषमादायापाग्नइत्यङ्गारान्प्राचः करोत्योदेवयजमि
त्यङ्गारमाहृत्य कपालेनावधादयति ध्रुवमसी त्यमुष्येति द्विषघ्ने द्वेभिचरन्नन्यत्रा
पिसव्याङ्गुल्या श्रन्येङ्गारान्निदधात्यग्ने ब्रह्मेति धरुणमिति पश्चात्पुरस्ताद्धर्त्रमिति
विश्वाभ्य इति दक्षिणतः समंविभज्य द्वे दक्षिणतएवमुत्तरतश्चितस्थेति तूष्णीमेव
मेकादशाग्नीषोमीयस्याधिकं दक्षिणतो भृगूणामित्यङ्गारैरभ्यूहति ॥४॥ उपसर्जनी
नीरधिश्रयति कृष्णाजिनमादत्ते पूर्ववत्प्रतिकृष्णाजिनं तस्मिन्दृषदं धिषणासी
तिपश्चाद्धम्यामुपोहत्युद्रीचीन्दिवइति दृषदुपलां धिषणासीति धान्यमसीति तन्दु
लानोप्यपिनष्टि प्राणायत्वेति प्रतिमन्त्रं दीर्घामिति कृष्णाजिने प्रोहति चक्षुषेत्वानीक्ष ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेपिष्यमाणेपुनिर्वपत्यैन्योमहीनामिस्याज्यंपात्र्यांसापवित्रायांपिष्टान्यावपतिदेवस्य
त्वेतिश्रपणस्यपश्चादुपविशत्स्वन्तर्वेदिवोपसर्जनीसनयत्स्वन्यःपवित्राभ्यांप्रतिगृ
ह्णातिसमापइतिसंयौतिजनयत्यैत्वेतिसमंघिमन्ज्यासःहरिष्यन्नालभतइदमग्ने
रिदमग्नीषोमयोरितियथादेवतमन्यद्विषेत्वेस्याज्यमधिश्रयसन्योपत्नीकस्याहवनी
येनछ्राषिणोघर्मोसीतिपुरोडाशंस्रुगपदुरुप्रथाइतिप्रथयतियावत्कपालमनक्ति
प्रथुमग्निष्टइस्त्विरभिप्रषतिसच्त्रिर्वापर्यग्निकरोत्सन्तंःरक्षोन्तरिताअरातम रितं४
इतिसहाज्यंदेवस्त्वातिश्रपणंमानेरिष्यालभन्तेतनमेरूरितिश्रुतावभिवासयतिभस्म
नावेदेनोपवेषेणवापाञ्जुलिप्रक्षालनमासेन्यानिनयत्स्वभितप्यप्रत्यगसःस्यन्द
मानन्त्रितायत्त्वेतिप्रतिमन्त्रमन्वाहार्यन्दक्षिणाग्नावधिश्रयत्स्वत्रवाव्रतोपायनं॥५॥ ॥१०॥

अपरेणाहवनीयंवेदिंखनतिञ्जङ्गुलखातांव्याममात्रींपश्चात्र्यरत्नीप्राचीमपरिमितां
वाप्राक्प्रवणामुदग्वामध्यसंगृहीतामग्निमभितोःसावामूलोच्छेदनादोषधीनामो
षधीनांमूलान्युच्छेत्त्वैब्रूयाद्दाहार्यंपुरीषांपशुकामस्यवेदिंपरिसमुह्यवित्तीयेग्नी
दुत्तरतउत्करंकरोतिदेवस्यत्वेतिस्फ्यमादायसतृणःसव्येकृत्वादक्षिणेनालभ्यज
पतीन्द्रस्यबाहुरितिनोपस्पृशेत्पृथिव्यात्मानोनेनस्तंबयजुर्हरिष्यन्वेघांतृणंनिद
धात्युरुकृत्पृथिव्यैवर्मासीतिपृथिविदेवयजनीतितृणेतर्हितेप्रहरतिव्रजङ्छेतिपुरीष
मादत्तेवर्षतुतइतिवेदिंप्रेक्षतेवधानेस्तुत्करेपकरोतिप्रहरणशेषोवाविशेषोपदेशादपा
ररुम्मितिद्वितीयंप्रहरणाद्यभिन्यस्यस्त्वाग्नीदुत्करमरत्नोदिवमितिद्रप्सस्तइतितृतीयं
तूष्णींचतुर्थःसतृणंपूर्वंपरिग्रहंपरिगृह्णातिदक्षिणतःपश्चादुत्तरतश्चस्फ्येनगाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रे ऐति प्रतिमंत्रं वेघात्रिरु च्छिस्व्या हहर त्रिरितिहुत्वाग्नी छेखा संम षतिपित यज्ञा
ग्निचित्स्ययोर्वा तत्रदर्शनाद त्रवेदिकरणं यथोक्त मुत्तरं परिग्रहं परिग ह्णाति सुक्ष्मा
स्योनोर्जस्वतीति प्रतिमंत्रं पूर्ववत्सुरा क्रूरस्ये सनुमार्ष्ये ध्यधिवेदिं प्रोक्षणी द्धोरयस्य
न्योथस्फ्यमुघं न्याहप्रोक्षणीरासादयेध्मं बर्हिर पसादयस्रुचः संमृद्धि पत्नीं सन्नह्या
ज्येनोदेहीति यदी छेद्य थाप्रेषितमन्यः परा धिकारा त्स्वयं वाविरोधात्सं प्रैषाबचनाच्च
प्राक्स्तरणाद्वेदि न्नावम शेघ्र तानिहविः ष्याप्रचरणादङ्गुष्ठांगुलिभ्यां मांश्स्तस
हिताभ्यामवद्य न्येक आपन्नं स्तृणन्निर स्येद्विषतोवघइतिस्फ्यमुदंच प्रहरस
वनिज्य पाणी अपरेणप्रणीता स्फ्यन्निदधाती ध्मा बर्हि श्च पूर्व मिध्मं प्रणीतारक्षिणे
नवाहस्य स्रुवं प्रतप्य पूर्ववद्वेदाग्रैरन्तरतः प्राक्संमार्ष्ये निशितइतिविपर्यस्य बर्हिर्मू ॥१०॥

लैः प्राङ्क्रम्य प्रतप्य प्रतप्य प्रयच्छ त्यनिशितेतिस्रुचस्तू स्नी प्राशित्रहरणं श्रुता
वदानं पात्रीं च संमार्जेनान्यपास्यत्याहवनीये प्रासनमेके ॥६॥ पत्नीं सन्नह्यतिप्रस्य
द्दक्षिणत उपविष्टा ज्ञा हं पत्नुस्यमुंजयोक्त्रेणत्रिवृता परिहरत्यधिवासोदिस्येरा
स्त्वेतिदक्षिणं पाशमुत्तरे प्रतिच्योर्ध्वमुद्गृहति विस्नोर्वेष्ण्य इतिनग्रंथि कुरोत्सूजैंत्वेस्या
ज्यमुद्वास्य पत्नीमवेक्षयत्यदब्धेनेति वेघां करोत्स्य परे प्रोक्षणीभ्यः आहवनीयेवा कृ
त्वात च्छापिणः सवितुस्त्वे त्याज्यमुत्पुनाति प्रोक्षणीश्च पूर्ववदाज्यं मवेक्षते तेजोसी
तियजमानोवा स्रुवेणाग्रहणं चतुर्जुह्वां धामनामेति सकृन्मन्त्रोष्टा उपभृत्स्यल्पी
योनुयाजार्थे चतुरन्यत्र प्रतिविभागात्यश्चातिथ्यादर्शनाच्च नकृत्स्नोपदेशास
श्चातिथ्ययोर्वचनाध्रुवायां च जुहुवदिध्मं प्रोक्षति विस्नः स्यवेदिं च बर्हिः प्रतिगृह्य

वेद्या ङ्कृत्वा पुरस्ताद्रूथिं कृष्णोसीति प्रतिमंत्रं २ शेषं मूलेषूपसिंच स्यदिस्येव्युन्दनमिति
पवित्रे निधाय प्रणीतासु बर्हिर्विस्त्रं २ स्य पुरस्तात्प्रस्तर ग्रहणं विस्तोरिति प्रस्तणे
प्रदायसन्नहनं विस्रं ३ स्य दक्षिणस्यां वेदिश्रोणौ निधायान्येर वच्छाद्य वेदिं ३ स्तृणात्यू
र्णम्रदसमितित्रिवृद्दुपपत्स्यावा बहुलमधर मूलं पश्चादपवर्गं प्रव्रह न्वात्रोद्वा
सनमाहवनीयश्चापिण ३ इ ध्मात्समिधमादायाहवनीयं कल्पयत्यूपर्यु परि प्रस्तरं
धारयन्त्रुत्स्रुकेउ दूहत्स्यनुयाजार्थे तृ॥ ७॥ परिधीन्परिदधात्याद्रांनेकवृक्षीयान्बा
हुमात्रीन्पालाशवैकंकतकार्ष्मर्यवैल्वान्पूर्वालाने पूर्वालामनउत्तरान्खादिरौदुंबरान्वा
मध्यमदक्षिणोत्तरान्गान्धर्व इति प्रतिमन्त्रं प्रथमं परिधि ३ समिधोपस्पृश्य वीतिहोत्र
मित्यादधात्युपस्पृश्य द्वितीया ३ समिदसीति सूर्य स्त्वेति उपस्थाहवनीयमीक्षमा ॥१९॥

णस्तद्वचनस्त्वादावृत्स्यविदिं बर्हिषस्तृणेति रश्चीनिदधाति सवितुरित्स्यन्यो वायुरुत्त्वादत्य
त्रापितृणार्थे यूपां जनेच सर्पिः पुरोडाशपयस्याधानासु चच्छ स्तयोः प्रस्तर ३ स्तृणात्यू
र्णम्रदसमित्यभिनिदधात्यात्वावसवइति सव्याश्चन्ये जुहूं प्रतिगृह्याभिदधाति घृताची
स्येवमित्तरेउत्तराप्रतिमंत्रं बर्हिष्युपभृतं ध्रुवां चावकृषेनुपूर्वं पुरोडाशावभिघार्यो
द्वास्योपस्तीर्णे निधायानक्ति यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनुयो वितस्थे ॥ ८
आत्मन्वान्सोमघृतवान्हि नस्त्वाग्निं गच्छस्त्व यजमानाय विंदेति मधादेवतमन्यत्प्रस
नक्ति कपालानि यानि घर्मे कपालान्युपचिन्वन्ति वेधसः ॥ पूस्तस्तान्यपिवृतइन्द्रवा
यूविमुंचतामिति तूष्णींवा संख्ययो■द्वासयति प्रियेण धाम्नेति हवी ३ षि वेघां कृत्वा ध्रु
वा असदन्निति सर्वाण्यालभते पाहि मामित्यात्मानमत्रवाप्रतोपायनम्॥ इति कात्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनस्तत्रेद्वितीयोध्यायः॥२॥ होतृषदनङ्कृत्वापरेणवेदिं श्रोणिंवोत्तरेणेध्मात्समिध
मादायाग्नयेसमिध्यमानायानुब्रूहीत्याहहोतरितिचैके प्रथमस्थानेनप्राक्स्विष्टकृतो
मध्यमेनेडायाःशेषमुत्तमेनसन्ततन्त्वन्निवमेनुब्रूहीत्याहयजमानोङ्गुष्ठाभ्यांचावबाध
तेपाद्याभ्यांवेदमहमस्मुमवबाध इतिद्वेष्यमनावेद्विषन्तंभ्रातृव्यमितिवापावस्ता
मिध्येनीवेदेदमहन्तावतिथेनवज्रेणेतिप्रतिप्रणवमाधानःसमिद्ध इतिप्रागतःस
र्वमिध्ममेकवर्जमनुयाजार्थेदनुवचनान्तेवेदेनाहवनीयंत्रिरूपवाज्यस्रुवेणपूर्वमा
घारमाघार्याहाग्निमग्नीत्सम्मृड्ढीतीध्मसन्नहनैरनुपरिधिसंमार्ष्ट्यग्नेवाजजि
दितित्रिस्त्रिःपरिक्रामन्तूष्णीमुपर्यपरमाहवनीयादंजलिंकरोतिनमोदेवेभ्यस्वधा
पितृभ्य इतिदक्षिणतउत्तानमपस्पृश्यस्रुयमेमइतिजुहूपभृतावादायोत्तरांजुहू ॥१३॥
हूत्वादक्षिणातिक्रामत्यंघ्रिणाविष्णवितिपरिधीनपरेणसंचरोहाथ्यतःसव्येनेतोद
क्षिणेनामुतोवसुमितीमित्यवस्थाय॥१॥इतइन्द्र इतिजुहोत्युत्तराघारमाघार्यासह
स्पर्शयन्स्रुचावेस्यजुह्वाध्रुवांसमनक्तिसंज्योतिषेतिनिधायेध्मसन्नहनान्यादा
योश्रावयेत्याहास्तुश्रौषडित्यग्नीद्देवबर्हिरिध्मशकलमपच्छिद्यैकएवंसर्वत्रा
श्रुतप्रत्याश्रुतेष्वथप्रवणीतेग्निर्देवोदैव्योहोतादेवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भ
रतवदमुवदमुवदितियजमानार्षेयाण्याहपरस्तादर्वाञ्चित्रीणियावंतोवामंत्रकृतः
पुरोहितार्षेयेणवाक्षत्रियवैश्ययोश्चनित्यमनुवदितिवासर्वेषांब्रह्मण्वदाचक्ष
ब्राह्मणाअस्ययज्ञस्यप्रावितारोसौमानुषइतिहोतृनामग्रहणमुपांशुवासमष्टा
उपविशतोग्निर्होतेतिस्रुगादापनंप्रयाजेषुसन्निचेष्टतथतीमिस्रुक्तेस्रुचावादाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिक्रम्याश्राव्याहस्तमिध्मोयजेत्तिपंचप्रयाजान्समिद्धतमेयजयजेतिशेषंध्रुवस्तिष्ठ
न्पूर्वंपूर्वंवाभिक्राममुपभ्रतोजुव्हामानाःयस्यनवमग्रंशेश्चतुर्थमेवंप्रवद्धावनुया
जेषुचोत्तरांजुहूमध्युह्यप्राचीमवहृस्तजुहोत्येवंसर्वत्र॥२॥नाभिदेशेधारणंप्रया
जानुमंत्रेणमेकोममेक्रांतस्ययोस्मांद्वेष्टियंचवयंद्विष्मइत्येवमिथुनेर्यधासख्यंन्तत
स्यकिंचनेतिपंचमेच्छिपिमानपचितिमान्यशास्त्रीब्रह्मवर्चस्यन्नादइतिचागंतूनांच
तुर्थपंचमाभ्यांस्थानात्प्रथमचतुर्थीभ्यांवायथालिंगंसर्वान्वोत्तमेनोपाप्यित्वादेस्य
जुव्हाभिघारणंध्रुवायाहविषउपभ्रतश्चाज्यभागाभ्यांचरसाग्नेयेनसौम्येनचतुस्
वत्तहःस्वषट्कारास्वनिधायावदायावदायध्रुवामभिघारयत्याप्यायतोध्रुवाहविषा
घृतेनयज्ञंयज्ञंप्रतिदेवयद्भ्यःसूर्यायाऊधोअदित्याउपस्थेउरुधाराप्थिवीय ॥१३॥

सेअस्मिन्निसनुब्रूहीत्युक्त्वानापव्याहरेद्धोताचाश्रावणादाश्राविनेग्नीदाप्रत्याश्रावणा
त्प्रत्याश्राविनेध्वर्युराहोतषाद्धोतावषट्कारात्सोमेचग्रहंगृहीत्वोपाकरणादुपाकृतउ
द्गातारआहोतप्रेषाद्धोतावषट्कारादाग्नेयमुत्तरपूर्वार्द्धेदक्षिणपूर्वार्द्धेसौम्यंसमि
द्धतमेवाहविर्भ्यांचपुरोडाशावन्तरेणाग्नीषोमाउपांश्वाज्यस्यविष्णुर्वामावास्यायां
होत्राम्नानाधावद्धविरुत्तरार्द्धात्स्विष्टकृतस्तत्रएवहोमोनाज्यादशेषादस्सत्राषामा
हुतिभिर्निधाय॥३॥संचरमभ्युक्ष्यप्राशित्रवद्यतियवमात्रंपिप्पलमात्रंवान्यतरत
आज्यमुभयतोवाग्नेयाद्भागांश्चाध्वर्युःसंचरेणब्रह्मणेप्रदायपूर्वेणैकेपउपस्पृश्ये
डांपंचावत्तोंदक्षिणतोमध्याच्चयावद्धविःस्विष्टकृद्वदाज्यंयजमानभागंपूर्वार्द्धाद्धीर्घं
प्राशीर्यपुरस्ताध्रुवायाःकरोतीडांहोत्रेप्रदायाविरुज्यंदक्षिणातिक्रामतीडांप्रतिगृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्य होतुरंगुलिपर्वणी अनक्त्यवांतरेडामादधाति पूर्ववदिडां च सर्वे न्वारभंते इडोप
हूतेत्युक्ते यजमान आग्नेयं बर्हिषदं करोति अध्नपिन्व स्वायुर्मे धुक्ष्व प्रजां मे धुक्ष्व पशू
न्मे धुक्ष्व ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व योस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्रजा
या पशुभिरा प्यायस्वेति तं च ध्नीं कृत्वा बष्प स्त्रिग्ध्य आदिश्य स्वोनो वाविशो षादत्र पितर इ
ति यजमानो जपति विस्त ज्यामीमदन्ते स्येके कमा हरति द्यावापृथिव्योरुपक्लानेग्नीधे षड
वत्ते प्राश्नी सुपहूता पृथिवी स्याश्यास्तने मयीदमिति यजमानो जपसु पहूतां प्राश्नंतियुक्ता
य जमानश्च पवित्रयोर्मार्जयंते परेण वेदिं सुमित्रियान इति यजमानस्य प्राणापानौ
पातमिति प्रस्तरे नेक रोति तूस्ती वा त्रवा ब्रह्मा प्राश्नाति भागमस्मै परि हरति यजमान
भागं चा प्रोषिते न्वाहार्यमभिघार्यो द्वास्या न्तरा ब्रह्म यजमानो हत्वा वेद्यान्निधायालभ ॥१४॥

ते प्रजापते र्भागोस्यूर्जस्वा न्पयस्वा न्प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ
मे पाह्युर्गस्यूर्जं मयि धेह्यक्षितिरसिमा मे क्षेष्ठा अमुत्रामुष्मिन्लोक इह च नितिसाक्षि
णो दगुद्वासयति हविष्व ॥४॥ समस्यान्मुके समिधमादायाह ब्रह्मन्प्रस्थास्यामि समि
धमाधायाग्निमग्नीत्सम्मृड्ढीत्येषा न इति होतानुमंत्रयते जानन्ति यजमानः संमार्ष्टि
पूर्ववदपरिक्राम सकृत्सकृत्सस्त वा सम्मिति ब्रह्मानुज्ञातो नुयाजेस्त्रि भिश्चरस्यो
पभ्नत समानीयाति क्रम्याश्राव्याह देवान्यजेति यजयजे स्युत्तरौ देवान्देवानिति वा
सर्वत्र नियम शब्दादिद्धि कृति दर्शनाच्च प्रतीचो जुहोस्युपसत्सु च ध्रुवचतुर्थं समा
नीय प्राचीमभिचरन्ननुयाजानुमंत्रणमङ्गान्यमुं जहि हादुन्यमुंजह्युल्मुकमुंजही
त्येवं प्रवृद्धो संभवि नजेत्स्वस्थानां स्येन वोपाप्यि त्वीदस्य जुहूपभ्नतौ व्युहत्यग्नीषोम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो रिति जुहूं प्राचीन दक्षिणे नो त्माने नाग्नीषोमौ नमिति तीनरे णो त्तरान्नी चाप्रतीचीं यथा देव
तमन्यद ध्वर्युर्वान्नूजय त्वंयं यजमानो वा जस्येन मिति पूर्वे यमयंय जमानो द्वेष्टि य श्चैनं
न्द्वेष्टि स्युत्तरे भ्युक्ष्य जुव्हा परिधीनननक्ति यथा पूर्वम्॥५॥ वसुभ्य इति प्रतिमंत्रं प्रथमं प
रिधिं गृहीत्वा श्राव्या हे षितादे व्या होतारो मद्रवा च्यय प्रेषितो र्मनुषः सूक्त वाकाय सूक्ता
ब्रूहीति प शो प्रेष्येति सं जानाथा मिति प्रस्तरा दानं विधृतीस्थाने कृत्वा न क्षेयनं व्येतु वय
इत्यग्रं जुव्हामुपघ्नति मध्यं मूलमिति नरस्यां मरुतामिति नीचैर्हत्वा तृणमादायानु प्रहर
ति हस्तेनाचरति यजमान भागं च प्रोक्षितेक्ष त्रियवैश्ययो श्चनिस्य मह त्वदस्मिमदसित्व
मेतन्मम त्वंयोनिस्तव योनिरस्मि॥ मम वसं दिविदेवेषु धिपुत्रः पित्र्ये लोके कृजातवेदः
स्याहेति सूक्तवाका नेग्नीधा हानु प्रहरेति प्रास्य तृणं चक्षुष्पा इ स्या त्मानमालभते सं ॥१५॥

वद स्वागानग्नीदगं श्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयो र्ब्रूहीसे
तेषां संवद स्वागं श्रौषडित्यग्नी छेषमितरो व्यस्या संस्रतः परिधीननु प्रहरतियं प
रिधिमिति प्रथममितरौ चयुगपदग्नेः प्रियमिति स्रुचौ प्रतिगृह्णाति स स्रुव मागाइ
तिसंस्रवां जुहोति घृताचीइति धुरि निदधा त्वनसि चेद्र्हणं स्फ्ये पात्र्यां चेद्यज्ञ
नमश्च त इति वेदिमालभते वेदिं होतास्रुक्स्रुवमध्वर्युराज्यस्थालीमग्नीदादाय॥१६॥
पत्नीसंयाजेभ्यो गार्हपत्यं गच्छन्त्यध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्यपूर्वेणापरेणा
त्तरेण पत्नीमिके षामुपविश्य दक्षिणं जान्वाच्यैव सर्वत्रौपविष्टहोमेषु पाशुचर
ति चरणशब्दे सर्वा देवतान्यत्र यजति सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमि
ति तृतीयेन्त्तर्द्धानं पुरस्तात्पत्न्यं न्वारभते धयु शं घन्तं भवती डान्तं वा शंय्वन्ते वेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृणमादायानक्ति प्रस्तरवत्स्रुचि स्रुवे स्थाल्यां चाग्नीद्दानुप्रहरेति प्रास्य तृणादि
पूर्ववद्बधं घन्ते स्रुक्स्रुवं प्रगृह्णाति स्यग्नेरदब्धायवितिसव्येनावस्यदक्षिणाग्नौ जुहो
सग्नय इति सरस्वत्या इति चोलूखले मुसले यच्च शूर्प आश्लिष्टं दृषदि यत्कपा
ले ॥ उत्प्रुषो विप्रुषः संजुहोमि स्वाः सन्तु यजमानस्य कामा स्वाहेति ॥७॥ पिष्टले
पां जुहोति पत्नीं वेदं प्रमुंचति वेदोसीति योक्त्रं च प्रमामुंचामि वरुणस्य पाशा येनमा
बघ्नात्सविता सुशेवः ॥ ऋतस्य योनौ सुकृतस्य लोके रिष्टां मा सह पत्या दधाम्येति
स्तृणात्या वेदेर्धौ नः स्तमिष्टयजुर्जुहोतीदेवा गातुविद इति बर्हिः संबर्हिरिति वे
द्यां प्रणीतानि नयति परीत्यस्कन्देति पुरोडाशकपालेन कणान्नपास्य स्वधः कृत्वा जि
नः रक्षसामिति पूर्णपात्रे निनयति परीत्य संततं यजमानोंजलिना प्रतिगृह्णाति ॥१६॥

सं वर्चसेति मुखं विमृष्टे विष्णुक्रमान्क्रमते दिवि विष्णुरिति प्रतिमंत्रं पृथिव्यामितीत
ऊर्ध्वो वास्मादन्नादिति भागमवेक्षते स्यै प्रतिष्ठाया इति भूमिमगन्मस्वरिति प्राक्सं
ज्योतिषेत्याहवनीयः स्वयंभूरिति सूर्यं वर्चोदा इति यं वा कामं कामयते सूर्यस्ये
त्यावर्तते प्रदक्षिणं ग्रहग्रहणप्रतिगरहोमेषु च तूष्णीं गार्हपत्यमुपतिष्ठतेऽग्ने गृ
हपत इति शतं हिमा इति ब्रूयाद्यात्सूर्यस्येत्यावर्तते प्रदक्षिणं गच्छति प्राङुरु विश्वा
विति ततोस्मिं तंतुरस्यनुमा तनुष्वास्मिन्यज्ञेस्याः साधु कृत्यायामस्मिन्नन्नेस्मिं ध्रो
कइदं मेकर्मेदं वीर्यं पुत्रो नु संतनोत्विति पुत्रस्य नाम गृह्णीयात्स्यानो विद्यमाने नन्त
वेत्वा ज्योतिषे त्वेति वाहवनीयमुपतिष्ठते तूष्णीं व्रतं विसृजते येनो पेयात्स यज्ञप
तिरश्शिषेति भागं प्राश्नाति ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयतीति श्रुतेस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यपतीतिश्रुतेः॥ ८॥ इति कात्यायनसूत्रेतृतीयोध्यायः॥ अपराह्णे पिंडपितृयज्ञश्चं
द्राद‍र्शनेमावास्यायां दक्षिणाग्नौ श्रपणं होमश्च परिस्तीर्य पूर्ववत्पात्रासादनमे
केकशोपरेणगार्हपत्यं चरुमपूर्णां स्रुचेवातूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमव
हंतीतिष्ठन्सकृत्फलीकरोतिसारतंदुलमर्णं श्रपयित्वाभिघार्योद्वास्य मेक्षणेनजु
होत्यग्नय इतिसोमायेतिच प्रास्यतद्दक्षिणेनोल्लिखत्यपहता इत्यपरेण वोल्मुकं पर
स्तात्करोतियेरूपाणीत्युपादश्रेणावनेजयत्यपसव्यं सव्येनवोद्धरणसामर्थ्याद
सावव नेनिक्ष्वेतियजमानस्यपितृप्रभृतित्रीनुपमूलं सकृदाच्छिन्नानिर्लेखायां कृत्वा
यथावनितं पिंडंददात्यसावेतत्तइतियेचत्वामन्वितिचैके अपित्तरइत्युदङ्ङास्त
आतमनादावर्त्तामीमदन्तेतिजपत्यवनेज्य पूर्ववन्नीविंविस्रंस्यनमोवइत्यंज ॥ १७॥

लिंकरोत्येतद्व इत्युपास्यतिसूत्राणि प्रतिपिंडमूर्णादशांवावयस्युत्तरेयजमानलोमानि
वोर्जमित्यपोनिषिंचत्यवधायावजिघ्रतियजमानउल्मुकंसकृदाच्छिन्नान्यग्नावाधत्ते
तिमध्यमपिंडंपत्नीप्राश्नातिपुत्रकामाप्रेतेभ्योददातिजीवत्पितृकोपिजीवान्तर्हिते
पिजीवपितृकस्यहोमान्तमनारम्भोवानव्यवेतेजातकर्ण्योनजीवंतमतिददातीति
श्रुतेः पूर्वोवात्वांपिंडपितृयज्ञः प्रकरणकालंलिंगानुग्रहवचनानाहिताग्निश्रुति
भ्योनङ्गमङ्गंवासमभिव्याहारादनाहिताग्नेरप्येषः॥ १॥ श्वोनोदेनेत्यद्दष्टेवापर्णशाँछि
नत्तिशामीलींवेषेत्वेत्युर्जेत्वेतिवाछिनत्तीतिवोभयोः साकांक्षत्वात्सन्नमयामीतिवो
त्तरेबहुलपलाशामशुष्काग्रां प्रागुदीचीमन्यतमांवाश्रतमुपैतियथोक्तंवामातृभिर्व
त्सान्त्सं सृज्यवत्सं शाखयोपस्पृशतिवायवस्थेत्युपायवस्थेतिचैकेदेवोवइतिमा

त्णामेकांव्या वृत्त्यै त्वं भवतिमाहे त्वं वायजमानस्य पशूनि स्यग्न्यगारस्यान्यतरस्य पुर
स्ताच्छारवामुपगृह्णति मूलादुपवेषं करोति वेषोसु पवे षोद्विषतो ग्रीवा उपवे विद्धि वेः
शारं अग्नेसु भगधारये ह॥ ऋद्ध्या कर्मण्या अनपायिनो यथा सन्निति सान्नाय्ये शा
रवासंयोगादुपधानाद्दोभयोर्वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशौ त्रिवद्वा
यवाग्वाग्निहोत्रहोमः सन्नयतस्ता ः रात्रि ः हुतउस् ष्टां प्रब्रूनादि स्याह श्रोक्ते द्यौर
सीति स्थाल्यादानं मातरिश्वन इत्यधिश्रयति वसोः पवित्रमिति पवित्रमस्याङ्कुरोसु
दग्ध्वा वाग्यतो दोहयत्यश्वङ्गेणास्याल्यन्वारब्धे देवस्त्वेत्यासिच्यमाने जपति कामधुक्षः इति प्रश्नः प्रोक्ते सा विश्वायुरित्याहैवमितरे उत्तराभ्यां प्रतिमंत्रं विसृष्टा वागुत्त
राअनन्वारब्धे यावत्त्वमधिकारात्तिस्रो वा नि स्त्वादादि सामर्थ्याद्दर्शनाच्च परीक्षा ॥१८॥

लनमानयति सम्प्रत्यधम तावरीरुर्मिणामधुमत्तमाः॥ पंचतीर्मधुनापयोमन्द्राधन
स्य सातयः इत्युद्वास्यातनक्ति प्राग्घुतशेषेणेन्द्रस्य त्वेति सोदकेनापिदधा त्यमन्मये
न विद्लोह व्यमिति निधायवत्सापाकरणपूर्वं व न्प्रातरग्नेय ऐन्द्राग्नयश्च द्वादशकपा
लो सन्नयतो निरुप्याज्यं प्रातर्दोहनमन्यस्मिन्परिक्षालनान्तद्वृत्वासायन्दोहमाहु
स्य प्रातर्दोह ः श्रपयित्वाभिघार्योद्वास्याभावनक्ति श्रुतस्याग्नेव घतीति श्रुतेः समस्य
मार्जनमिन्द्राग्न्योरिति व्यूहन ः सह शारवया प्रस्तरानु प्रहरणं परिधिभिः सहोपवेषं
जुहोति जुहोमि त्वा सुभगे सौभगाय पुरू ल संपुरहू त श्रवस्य त्निति पौर्णमासवृदन्य
दसद्यः सोमयाजी सन्नये त्कामादितरस्त्रि ः शतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत
पंचदशदाक्षायणयज्ञ्यग्निहोत्रमेव वा जुहुयात्॥२॥ कर्मशब्दो द्रव्यदेवतायुक्तो यज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिदर्शपौर्णमासधर्मा इष्टिपशुषु सामर्थ्याद्दर्शनाच्चवैश्वदेवधर्माश्चातुर्मास्येषु वच
न प्रवृत्तिभ्यां ॥ सोमाच्चावभृथे सामप्रतिषेधात्कर्णवत्स शौनमंत्रोपदेशाद्विषये
लौकिकमयुक्तत्वाद्विधिविशेषः कर्मण्यैकद्विशब्दोपरिमाणद्रव्यदेवतागुणसामान्ये
भ्यो नियमो द्रव्यदेवताविरोधे द्रव्यस्य समवायादाभिक्षायामुभयोस्तन्निवृत्तेर्नैक
चोदनाद्दध्नः संघातात्पयसस्तद्वावात्पशोः सान्नाय्यस्य ■ तदुक्तं प्रायश्चित्तश्रुतेश्च
पयसः कालानन्तर्यधर्मानुग्रहेभ्यः सघस्त्वंकाशकृत्स्निरनुवादः पूर्वस्येतिवास्य
बादरीस्थानापत्तेर्द्रव्येषु धर्मलाभो विप्रतिषिद्धो यथार्थमूहश्चोदितेन प्रकृतावपूर्व
त्वाद्विकृतौ वचनार्थलोपविरोधेभ्यो प्रवृत्तिः परार्थोत्पत्तेस्तदभावे भावश्चोदित्वाद्वा
भावो न विपक्षे क्रियास्तुः समभिव्याहारात् ॥ ३ ॥ दाक्षायणयत्तः प्रजापश्चन्न्यक्षा
॥६१॥

स्कामस्य नाम फल्गुणयोगात्कर्मान्तर गुणविधानं वा सन्निधिसंपद्वचनाभ्यामग्नीषोमी
यः पौर्णमास्यामैन्द्राग्न्यौ मावास्यायां ॥ सान्नाय्यवत्प्रातरमावास्यायां पयस्यामैत्रावरुणी
तत्रैव दोहन ॥ श्रुतेवाद ध्यानयति वाजिनं निषिच्यो त्करे करोत्यनाज्यलिप्तं वा प्रहृत्य
तृणं तेन चरति विमुच्य वा स्रुचौ बर्हिरवसिंचन्नहातित दृषभेषुरे नोदधामीति श्रुते
र्वाजिभ्यो नुवाचयति प्रतिवषट्कार ॥ हुत्वा वाजिनशेषेण दिशो व्याघारयति दिशः ■ इति
प्रतिमंत्रं प्रदक्षिणपुरस्तात्प्रथममुत्तमाभ्यां मध्ये पूर्वार्द्धे चस्वाहाकारः सर्वत्र सा कांक्ष
त्वाच्छेषमुपह्वयस्वे स्वामं त्र्याम त्र्यन्न क्षणमुपहूतइतिप्रस्तोतायुक्तनामभिर्वा सोमे
चसाधारणेषु वा सामर्थ्याद्दत्तनां त्वा वाजिनां वाजिनं भक्षयामीति वा ज्यहं वाजिनस्योप
हूतस्योपहूतो भक्षयामीति वाजेवाजे न्न यामिति वाहो नध्वर्युर्ब्रह्माग्नीघजमानाः प्रथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोवोभयतस्तुयजमानोदाक्षायणंवादक्षिणासंयत्सरंवायजेतमासंसस्थनन्तमूत्रकृ
तमासासंस्त्रिवर्जयेत्॥४॥उपांशुकाम्यदेवताग्रयणेवैश्वदेवएककपालश्चावा
रुणाःप्राजापत्यःसावित्रश्चातुर्मास्येषुवैश्वदेवीवाय्यंतन्नहविःषिवायव्योग्नेनामे
त्रावरुणीचैंद्रःसौत्रामण्यांप्रथमोवायोधसश्चाग्नेयंप्रतिकाममाहरेत वर्षार्थेप्र
वृत्तौवाब्रूयाद्वृष्टिकामोस्मीत्यध्वर्युब्रूयात्पुरोवातंचविद्युतंचमनसाध्यायेत्सभ्रा
ण्यग्नीध्वंस्तनयित्नुंचवर्षंचेतिहोतारंसर्वाण्येतानीतिब्राह्मणमन्वारंभणी
याग्नावैष्णवएकादशकपालःसरस्वत्यैचरुःसरस्वतेद्वादशकपोलोदर्शपूर्णमा
सारंभेपष्ठौहीदक्षिणामिथुनौवैंद्रायविमध्यएकादशकपालःपौर्णमासमन्वादिवि
कल्पआदिसश्चरुरमावास्यां॥५॥आग्रयणेमेन्द्राग्नमग्रपाकस्यव्रीहिणायवानो ॥२०॥

चवैश्वदेवश्चरुःपयसिवाद्यावापृथिवीयएककपालउद्दस्यान्तोभ्छादयेदाज्येनाज्य
स्यवायजस्तुरोणानांवाचरुःप्रथमजोगौर्दक्षिणावैश्वदेवस्यचदर्शपौर्णमासानीजा
नोदक्षिणाग्निपक्वंचातुष्प्राश्यंब्राह्मणान्भोजयेत्किंचिदद्यादग्निहोत्रायण्मीनोनवैर
सायंप्रातरग्निहोत्रहोमस्तदाशितायावापयस्यादीक्षितव्रतंचोपसत्सुरोहिणोकुर्वी
तसुत्यासुसवनीयाःसौम्यःश्यामाकचरुरारण्यस्यवैणवोग्नीष्प्रपुनःसंस्कृतोरथो
दक्षिणाक्षौमंमधुपर्कौवर्षाध्वंतेवावासः॥६॥अमावास्यायामग्न्याधेयंकृत्तिकारो
हिणीमृगशिरःफल्गुनीपुहस्तोलानकामस्यचित्राचक्षत्रियस्यवसंतोब्राह्मणोब्रह्म
वर्चसकामयोग्रीष्मक्षत्रियश्रीकामयोर्वर्षाःप्रजापशुकामस्यंश्यरथकृतामग्न्यागा
रेकुर्वंस्तुदग्वंशावांपरन्दक्षिणपूर्वेद्वारेपौर्णमासवद्वपनंक्षौमेवस्तेहत्तेपत्नीच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ःस्थिते ध्वर्यवेदेयेगार्हपत्यागारे निर्मथ्याभ्याद धानिवैश्यकुलांबरीषमहानसा
द्वा दिवा भ्राति रात्रौ वो पास्तमयन्दे वापितरः पितरो देवायो ह स्मि ससन्य जे॥ य
स्या हमस्मिन तमन्तर यामि स्वम्मइष्टं स्वं श्रातं स्वं हुतमस्त्विति पूर्वेण प्र
विशति दक्षिणेन पत्नी पश्चादग्नेरुपविशति दक्षिणतः पत्न्यश्च स्थ शामी गर्भारणी
प्रयछत्यभावे गर्भस्य वाचं यछा पूर्णाहुतेरित्या हास्तमिते निशायां पर्युदयं वा प्र
धान काल त्वात्॥७॥ गार्हपत्यागारे जं ब ध्नाति न वा विद्यमानं प्रातरग्नी धेद्या
दस्तमिते रोहिते चर्मण्यानडुहे चत्वारि हविष्पात्राणि मिमीते तिं चातुष्प्राश्यं पच
त्युद्वास्यासेचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तीस्त्रः समिधो घृताक्ता आदधा
ति समिधाग्निमिति प्रत्यृचमुपत्वेति जपति द्वितीया वाध्वर्युश्चत्वार ऋत्विजः प्रा ॥२९॥

अन्तिराद्धस्तेब्रह्मौदन इत्याहवरन्ददातिसंवत्सरं वा पुरस्तात्कुर्यात्ततः सर्वानादधीतगा
र्हपत्येनुगते ग्नामाग्निमाहृत्य चातुष्प्राश्यं त्वोपे विहरे शात्रिं जागरण धारणे शक
ले र्वा सुष्टामुपश्रा ~~मणम~~ दक्षिणावासः हरेदन्वाहार्यपचनश्चेत्स्यान मुह्निस्या न्यु
क्ष्यान्वारब्धे हिरंण्यं निधायोत्वा रब्लूत्कारान्निवपत्यन्ते सु शार्करा हिरण्य मुपर्ये
क एवमितरयोः पुरस्तादाहवनीयस्याष्टासु प्रक्रमेषे कादशसु द्वाशे देसु मस्या
वेतरस्य वितृतीये दक्षिणतउत्सृत्याग्निमंथनमनुस्तृत एकउ दिते तूद्धरण
मपरेण गार्हपत्यायतनमश्वमानयेति अयाहिथ्यनेश्वे पुरस्ता आतेवरदानम्न
न सैकेतस्याभिश्वासः प्राणमम तेरदधइत्युष्णसोमत प्राण आदधइति॥८॥
दारू भिर्ज्वलन्तमादधाति भूर्भुवः इति संभा रेषु मुष्य त्वात्र तपते व्रतेनादध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतियथर्षिवरुणस्यत्वेतिक्षत्रियस्येन्द्रस्यत्वेति राजन्यस्य मनोष्टाग्नामण्य इतिवैश्य
स्य ऋभूणान्त्वेतिरथकृतोरथन्तरंजायेतिप्रेष्यतिगायनमध्वर्यो ब्रह्मावावेदयोगा
युक्तः कृत्वाध्वर्यो रिध्मेनोद्धरणमुपयम्यपथैनं धूममुपेयाद्दामदेव्यमितिप्रे
ष्यत्यश्वःपुरस्ताद्युवानदभावेयुवाश्वाभावेनद्वान्संभारानधिष्ठाप्यदक्षिणपू
र्वपादेनप्राचंनीत्वावर्त्यस्थापयतिबृहदितिप्रेष्यत्यनेनप्रथमेनवाभूर्भुवस्व
रितिपूर्ववत्पुरस्तात्परिक्रम्येध्मपूर्वोद्धृहीत्वाद्यौरिवभूम्नेस्वाहायज्ञेरिति
चोपतिष्ठतेसार्पराज्ञीभिर्दक्षिणाग्निमादधातिसभ्यंचनिर्मथ्यंगांदीक्षध्वमिस्वा
हधारणोपस्थानमतः॥२८॥शैतवरवन्तीययज्ञायज्ञियानीतिचप्रेष्यतिदक्षिणे
नाग्नीन्परीत्योदगुत्सृजत्यतुनक्षत्रसंभारसामवपनचातुष्प्राश्यजागरणेध्माः॥२२॥

ग्निनापदंद्विरूपस्यतृतीयेनादधातिद्वितीय

पूर्वाहोन्वारंभणसार्पराज्ञीर्नवाकुर्यादग्निहोत्रंचतूष्णीं श्रुतेःपूर्णाहुतंजुहो
तिनिरूप्याज्यंगार्हपत्येधिश्रित्यस्त्रुकुस्त्रुवंचसंमृज्योद्वास्योत्पूयावेक्ष्यगृही
त्वान्वारब्धएवंसर्वत्रस्वाहेतिवरंददामीतिवाग्विसर्जनन्द्वादशाहान्तेतनुह
वींषिनिर्वपतिमासेद्वितीयेतृतीयेषण्मासेसंवत्सरेसद्योवानवाग्नयेपवमाना
यप्रथमाग्नयेपावकायाग्नयेशुचयेद्वितीयादिस्त्येचरुस्तृतीयाग्नेयएववापु
रस्तादादित्यस्यषड्दक्षिणाप्रतिविभज्यददातिद्वादशचतुर्विंशतिंवाभूयसीश्च
यथाश्रद्धंधेनुरादित्यस्यानतातिथ्यपनोदपूर्तिदार्वाधानवीत्सपक्वनाभ्युदकानि
वर्जयेत्ब्रह्मचार्यग्निनित्यधारीक्षीरहोम्यग्निमुपशायीद्वादशरात्रंषड्रात्रंत्रिरा
त्रमंततः॥१०॥पुनराधेयमाधानाप्रतिज्ञातस्यराज्ययशस्कामस्यवात्रिरात्रावरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नीनुत्सृज्यसद्यो वा पुनर्वस्वोर्वर्षासु मध्यन्दिने वा कुशेराधानं श्रीत्वष्टृपमर्कपला
शयोः पक्षे ज्ञाहं पत्यस्थाने निदध्यात्स्वमाहवनीयस्य यावत्संस्थे श्लेदाग्नेयः पं
चकपालउपांशु प्रागुत्तमादनुयाजोत्तह्रज्यैवाग्नौ निति वा प्रथमे प्रयाजे नु
याजे चाज्यभागौ द्वितीयोग्नये पवमानायेन्दुमते वा हिरण्यन्दक्षिणानड्वान्वा
ग्न्याधेयिकी श्रेष्ठ भूतेरग्न्याधेयवदन्यत्सैद्योपराह्णे मैत्रावरुणीवशा नस्तमि
ते पुरोडाशेडान्तं द्व्यौ रात्रिश्रुतया प्रातश्चरंति तन्न आधानं॥१९॥सायमाहु
त्यां हुतायां यजमानोग्नीउपतिष्ठतेवात्सप्रेणनवातिसृभिस्त्रिरूपप्रयन्तोस्यै
प्रत्नां परिते चित्रावसवितिचसन्त्वमिसुपविश्य गां गछुस्यन्धस्थेतिसंहि
तेस्यालभते गार्हपत्यं ज्योपतिष्ठत उपसेति गां ज्योतीड एहीति काम्याः ए ॥२३॥

मुपवसथेनवावसितेवातस्मिन्यचे पुरमासंस्पाकषाणावे गोःपयोधिश्रपितवै
श्रूयात्तद्ब्राह्मणं पाययितवै ब्रूयादन्तरेणापराग्नी त्वोगे दक्षिणेन वा प्रदक्षिण
माहवनीयं परीत्योपविशति यजमानः पत्नी च पूर्ववदपरेणाहवनीयं कूर्चे
निदधाति कुशान्वा परिस्तरणं वा सर्वेषां प्रागुदग्निरुदगग्नान्दक्षिणाग्नान्क
रोतीति श्रुतेराहवनीयं पर्युक्ष्योदधारां निनयत्यागार्हपत्यात्तं च ततो दक्षिणा
ग्निं हुते च धारावर्जं॥१३॥अग्निहोत्रीं दोहयति पुंवत्साम शूद्रेण स्थाल्यामा
यरूत्यां मृर्ध्वकपालायां दक्षिणतः प्राचीमुदीचीं वा पूर्वेणाहवनीयमाहृत्सगा
र्हपत्ये धिश्रयत्युत्तरतो निर्ह्यांगारानेवमन्यत्रापि होमार्थस्याहरणं दक्षिणेन
वैषधं तृणेनावज्योत्यासिच्यापः पुनरवज्योत्स्य निधायत्रिरुद्वासयत्सुदग ॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेसालभतेसोमानमिस्तुनुरकं व्रतोपायनवत्पौर्णमासवत्पुत्रनामग्रहणं भूर्भु
वस्वरितिवोमौप्रवस्यन्सर्वानग्नीन्प्रेतिप्रतिमंत्रंगच्छतिमस्थावाग्विसर्जनंप्रवस
न्यायजमानंकुर्याद्यथाकालमात्मसंस्काराद्धर्ममात्रत्वाच्छ्रुतेश्चैसाचमस्या
वाग्यमनंसमित्पाणिरनुपेत्यकंचिदुपतिष्ठतऽआहवनीयगार्हपत्यदक्षिणा
ग्नीनागमेतिप्रतिमंत्रंसमिसरिसमुहनानिचोपविश्यतूष्णींवोपस्थानंप
र्ववदेत्यचगृहामाबिभीतेतिगृहानुपैतिक्षेमायवइतिप्रविशतिनहिंस्याद्गृ
हान्कामंश्चः॥१२॥उद्धरेतियजमानोब्रूयात्सायंप्रातरग्निहोत्रेगार्हपत्या
दाहवनीयस्योद्धरणमनस्तमितेऽनुदितेसयोः प्रत्यङ्मुखोवासायन्निदध्यात्तस्मिन्स्सा
यंप्रातर्होमनमेकेनित्योदक्षि मिता णाग्निःसर्वेगतश्रियःसदावाहरणमेकेषा

न्तेवचनादेतानिसर्वत्रमरुद्भ्यःस्वतवद्भ्यःसप्तकपालोमारुतोवावैश्वदेवीपयस्या
द्यावापृथिवीयएककपालएतद्वैश्वदेवंप्राचीनप्रवणेहृतवासाःपत्नीचतएवव
रुणप्रघासेष्वपित्रेधाबर्हिःसन्नह्यपुनरेकधाकुशप्रस्वःप्रस्तरउपसन्नद्धआ
साद्याग्निमंथनमर्जंगैनित्रमितिशकलमादायवेधांकरोतिवृषणावितिकुश
तरुणेतस्मिन्नुर्वश्यसीत्यधरारणीन्तयोरापुरसीत्युत्तरयाज्यस्थालींसंस्पृ
श्यपुरूरवाइत्यभिनिधानन्त्या॥१॥अग्नयेमथ्यमानायानुवाचयतिमंथति
गायत्रेणेतिप्रतिमंत्रंत्रिःप्रदक्षिणंजातेजातायेतिप्रह्रियमाणायेतिप्राश्यन्नव
तन्नइतिप्राश्यसग्नावग्निरितिजुहोतिस्थाल्याःस्रुवेपानवत्प्रयाजेनवानुया
जंवरुणप्रघासामहाहविश्चत्रीणिसमिष्टयजूंषिजुहोतिदेवागातुविदोयज्ञप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मेषतऽइतिपशोचया आहव[redacted]इतिवापाशावेकंवावैश्वदेवेपर्वस७स्यासु
यपनंवाप्रागंसादपरेणादक्षिणाग्निन्दक्षिणंगोदानमुन्दतिसवित्राप्रसूता
दैव्याअपउन्दन्तुतेतनूं॥दीर्घायुत्वायवर्च्चसइतित्रेण्याशलल्याविनीयत्रीर
णिकुशतरूणान्यन्तर्द्धोस्योषधइति त्र्यायुषमितियजमानोजपतिशिवो
नामेतिलोहक्षुरमादायनिवर्त्तयामीतिवपसेवंपश्चादुत्तरतश्चगृहेषुपौर्णमा
सं समारूढे निर्मथितयोस्तयाचेत्प्रजाकामस्यापिवैश्वदेवमेकेध:प्राङ्शा
यीमध्यारुयतुजायोपायीमां समस्मन्नानिवर्जयेदुदकाभ्यवायंचप्रागवभृ
थात्॥२॥आषाढ्यामयन्तेयोनिरितिसमारोह्योदवसायनिर्मथ्यवरुणप्रांसा: घा
पूर्वे घुदक्षिणाग्नौनिस्तुषामभ्रष्टयवानांकरंभपात्रकरणंयावंतोयजमानस्य ॥२७॥

गस्याएकाधिकानिप्रजायांवाजातश्रुतेस्त्रिणिवानित्यत्वान्मेषमिथुनंचानैडकी
रूर्णाप्रक्षाल्याश्लेषयेतयो:कुशोर्णावाभावआहवनीयस्यपुरस्ताद्दक्षिणकरोति
प्रादेशोन्तरापथोवारथमात्रंमुत्तरचतुररत्नीवापश्चात्सहाप्राचीषडुत्रय:पुरस्ता
त्तेषांमध्येशंकुपरिमितावास्फ्यायास्तंमर्शनाकरोत्सुनयोरेकउत्करोपरेणवेदिंप्र
तिप्रस्थातु:संचरउत्तरवेदिन्निवपत्युत्तरस्यां संस्यामादाय चात्वालंमिमीतेपू
र्वेणोत्करं संचरंपरिहाप्यतस्यामुदीचीन्निदधातिपुरस्ताद्दक्षिणत:प्राचीमु
त्तरतश्चस्फ्येनान्तर्लिखतितत्पापनीतिप्रतिमंत्रंविदेदग्निरितिचात्वालेप्रहरति
स्फ्येनान्वारब्धेग्नेअंगिरइतिपुरीषं हरतिहस्तेनचयोस्यामितिनिवपतिपू
र्वार्द्धेशंकुसहितमग्नीदुत्करवत्तु स्त्री हृतमेवंद्विपरंद्वितीयस्मात्तृतीयस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिविशेषोनुस्येति चतुर्थं यथार्थमाह सस्सिंह्यसीसिव्यूहस्युत्तरवेदिं शम्या
मात्रीवितृतीयामपरिमितांयुगमात्रीं यजमानदशपद्यं वा सोमेवोत्तरे व्यप
स्फुरणश्रुतेरसंमावाचमध्येनाभिंकरोति प्रादेशसमां चतुस्रक्तिं प्रोक्ष्युत्त
रवेदिं सिकताश्च प्रकिरति सिंह्यसीति प्रतिमंत्रं ॥३॥ छन्नावसति प्रातःप
चगृहीतं गृहीत्वाग्नीप्रणयतीध्माभ्यामुपयम्य सर्वं वा विनज्य प्राहुतत्वात्प्र
णयनं सोमादूर्ध्वं त्वा स्वहृतेर्वा नाम त्वाहृहणं गुणार्थमुत्तरवेद्यग्निनिधा
नादाज्यं प्रोक्षणीरुद्यम्याग्नीचाहाग्निभ्यां प्रक्रियमाणाभ्यामनुब्रूहीत्येकस्फ्य
यानुदेहीति त्रिरुक्तायां पथोवेदिहरणं प्रतिप्रस्थोतास्फ्येनलिखत्यावेदि श्रोणे
रुत्तरवेदेर्वावेद्यन्तरे स्थितोदक्षुत्तरवेदिं प्रोक्षतीन्द्रघोषइति प्रतिमंत्रं प्रति ॥२८॥

दिशयथालिंगं दक्षिणांसस्सहितं बहिर्वेदिशेषन्निषिंचनीदमहं तं संवारमुभिस्या
भिचरं नाभ्याः श्रोणिष्वंसेषु पंचगृहीतं जुहोत्सक्ष्ण्या दक्षिणेंसे श्रोण्यां श्रो
ण्यामंसे मध्ये च हिरण्यपरस्यं सिंह्यसीति प्रतिमंत्रं भूतेभ्यस्त्वेति स्रुचमुद्यतिना
भिं पैतुदारव्येपरिदधाति पूर्ववद्ध्रुवोसीति प्रतिमंत्रं मग्नेः पुरीषमसीति निवपति गुग्गु
लसुगंधितेजनवृष्णेस्तुकाश्चोपरिशीर्षण्या अभावेणास्तेषु ग्निंनिदध्यासुद्धृता
वोक्षितेदक्षिणमुपयमनीरुपनिवपति प्रणीनाद्यनोप्रतोपायनं वा कृतं चेन्नि
त्येभ्योधिकान्येऽग्नपयस्येवारुणीमारुतीकायएककपालो नानाज्यं निर्वपण
दक्षिणप्रतिप्रस्थातुध्रुवायापुरस्तात्स्पृषदाज्यमाज्यंदधिमिश्रंपंचगृहीतंज्यो
तिरसीति समिदन्तेनानुयाजार्थं सर्वत्रौपभृतासादनं प्रियेण धाम्नेति वा विशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोपदेशादुत्तरं वापरकालत्वात्प्रतिप्रस्थाताचनवा प्रणीतापत्नीसन्नहनाग्निमं
थनाश्रुतप्रत्याश्रुतप्रैषयजमानवाचनहोतृषदनवरणप्राशित्रांगुलिपर्वांजना
वान्तरेडाभागापराग्न्यवभृथान्तं प्रतिप्रस्थातानुकरोत्यत्रदक्षिणस्यांवाजिने
निषिच्य॥४॥उभयोः करीराण्यावपति शमीपलाशमिश्राणि मेषमिथुनं च मारु
त्यां मेषं सर्वाणि हवींष्युत्तरस्यामासादतिमारुतीं स हाज्यं प्रतिप्रस्थाता
दक्षिणस्यां संमार्जनाय प्रेषिते संमृष्टे प्रतिप्रस्थाता पत्नीमानेष्यन्नाह केन च
रसीति संस्तुतानां चेष्टतृणानि वोमून्हाति प्रतिसंस्तुतमनाख्यातमहितं ज्ञा
तिभ्य इति श्रुतेराख्यातो प्रघासिनः इत्येनां वाचयति न यन्स्करं भपात्राणि जुहो
ति शूर्पेण मूर्द्धनि कृत्वा दक्षिणेऽग्नौ प्रस्रज्जुखौ जायापती वाद दक्षिणेनाहस्य ॥२९॥

तीर्थेन पूर्वेणं वा दिमपरेण वा पघ्राम इति मोषूण इति यजमानो जपस्यक्रन्क
र्मैस्यनां वाचयति प्रतिनयन्नागवते संमार्जनाद्याज्यभागान्त्यां स्रुक्पाणि
रास्ते प्रतिप्रस्थाताहविर्भिश्चरति पयस्याप्रचरणकाले मेषो व्यतिहरतोन्य
न्तरेणावदानेन सह मेषं सव्येन स्रुचो गृहीत्वा प्रतिप्रस्थातुर्वासो दक्षिणे
नमरुन्नोनु वाचयति वारुणीवदवदानं हविर्भिश्चरत उभौ स्विष्टकृतः प्रन्नी
डामवदाय प्रतिप्रस्थात्रे प्रयच्छति तत्र प्रतिप्रस्थाता नामारुत्याः स्रुचौ व्यूहतोध्व
र्युस्समासिंच्य वाजिनं भक्षोऽध्वर्युविस्कारात्प्रतिप्रस्थाता न भक्षे पुमैत्रावरुणश्च हो
त्रध्वर्युविकारात्समिष्टयजूंषि तूष्णीं दक्षिणस्यां वारुणीनिष्काषेणावभृथं तू
ष्णीं मेत्याभ्यवेत्य मज्जयस्व वभृथेति जायापत्नीस्नातो मज्जन्तावन्योन्यस्य प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रेयावतोन्येवास्तसीपरिद धाते पूर्वेदयादधिरूते भ्योयस्मा घइ्छे घयेतमे
स्याहवनीये समिदाधानं देवानां समिदसीतिपत्नीच गार्हपत्ये तूष्णीं न्ये
तुर्दक्षिणाग्नः षट्द्वादशवा ॥५॥ कार्त्तिक्यां साकमेधाष्यहं पूर्वेद्युः पूर्वा
ह्णे ग्नये नीकवते पुरोडाशो मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुः समिष्टय
जुरन्तं भवति बर्हिरनुप्रहरणवर्जं वेध्मस्थाने शकलपरिधिनिधायमरु-
द्भ्यो गृहमेधिभ्यः सायं चरुः पयसि सान्नाय्यवत्तूष्णीं वैकचोदनाश्रुते अपपि
स्वाभिघार्यो ह्यस्य शरावयोरुद्धरति पात्र्यां वा सेचनेमध्ये रूक्षासु सर्पिरासिंच
त्याज्यार्थं यावदुक्तम नस्तरणयजुषा वेदिमभिमृश्य तूष्णीं वारूत्वा सपरि
धिपरिधानं शकलान्याधायम ध्योध्रुवतावासादयति स्रुक्स्रुवं च संमार्ष्टितु ॥३०॥

ह्यस्य वा संमार्जनमाज्यभागाभ्यां चरुस्याग्नेयं दक्षिणे सौम्यमुत्तरार्द्धे गृहमेधिस्विष्ट
कृतौ चाज्यभागवत्समावदानाव प्रत्यभिघारणं चानुद्धृत्य वा सहितमाज्यमधि
श्रयत्यु ह्यस्याभव मासादयति न प्राशित्रमिडान्तं भवति पूर्वे मार्जनमुपहूय प्रा
श्नन्ति पुत्राय यजमानगृह्या हविरुच्छिष्टाशाकृत्विजो ब्राह्मणश्चान्ये बहुश्वेद
तिरिक्तां स्थाली निदधाति सान्तपनीयां संस्थाप्य प्रातर्वा शेषभागान्मा
न निर्वस्तात्संस्त ज्यनिबान्यावत्सं बध्नाति यवाग्वाग्निहोत्रहोमः प्रातर्हुत्वाह
त्वावा स्थाल्यादर्व्यादत्ते पूर्णा दर्वी सृषभमावृ पितवे ब्रूयादुते जुहोत्स व्याहृति
प्रस्ताजुहोधी स्वाह रेहिमइहि जुहोत्यृषभो दक्षिणा ॥६॥ मरुद्भ्य क्रीडिभ्यः सप्तक
पालैः अदित्यै चरुस्यत्रापि समानबर्हिषी वा कालकर्मैरुलान्म हाहविरुदवसाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मथ्यपूर्वेद्युर्वानिस्येभ्योधिकान्येन्द्राग्नोमाहेन्द्रश्चरुर्वैश्वकर्मणएककपालउ
त्तरवेद्यग्निप्रणयनमंथनपृषदाज्यंचवरुणप्रघासवद्वृषभोदक्षिणा॥७॥पि
तृयज्ञउपांशुश्चरणंपुरस्तादुपचारोब्रह्मयजमानयोश्चपूर्ववद्वापत्नीको
दक्षिणाग्निराहवनीयवत्सर्वेणाहवनीयंप्रणीताःपरिहरत्यर्थेबर्ह्यपितृभ्यो
बर्हिषद्भ्योधानाःपितृभ्योग्निष्वात्तेभ्योमंथश्चतुर्वाग्रहणंगार्हपत्यस्यपुरस्ता
दवहननपेषणेदक्षिणार्द्धेकपालोपधानेधानाभर्जनदक्षिणाग्नौश्रपणपेषण
विपर्यासेपिधर्माअभिमन्त्र्याद्धौःपिष्टानिवान्यादुग्धेसकृन्मंथितएकशला
कयामंथोग्रहणंमंथस्यग्रहणंवाचोदित्वात्ततोद्धौःपिंषंतीतिश्रुतेर्दक्षिणेन
दक्षिणाग्निंपरिवृत्तमुदग्द्वारंतन्मध्येवेदिंकरोत्यवान्तरदिक्स्रक्तिमात्स्यान्वेद॰ ॥३१॥

क्षिणाग्निंमध्येस्याःकरोतिप्रणीतानुहरणंब्रह्मयजमानौचानुगच्छतःस्फ्यादाना
दिकरोतियज्ञोपवीत्याज्यग्रहणेद्विर्वापमतिप्रागग्रंछिबर्हिर्विस्त॰स्थयूनंचाग्ने
गृहीत्वात्रिस्तृणन्नग्निपर्येतिप्रस्तरमात्र॰शिष्ट्वातावत्त्रिःपर्येतितं॰स्तृणास
विच्छतिप्राक्स॰स॰हविरासादनं॰सामिधेनित्रैषाघाज्यभागान्त्यायज्ञोपवीति
नःसर्वेपश्चात्सरीतोब्रह्मयजमानौपुरस्तादग्नीदाश्राव्यसीदहोतरिसेवब्रूयाद्रप
बर्हिषःप्रयाजाअनुयाजाश्चासमानयनंवाबर्हिःसंयोगात्॥८॥प्रस्तरगतीस्य
जुहोतिहविर्भिश्चरिष्यंतःप्रतिविपर्यन्तिसर्वेभ्योवद्यतिपर्यापूर्व॰सोमवद्धोम
ध्यासकृत्सकृत्सहावदंतिद्विरभिघारणमनतिक्रमणंचसोमायवापितृमतएवं
बर्हिषद्भ्यउत्तरतोधानामंथपुरोडाशानामग्निष्वात्तेभ्योदक्षिणतोमंथपुरोडाशधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानां पुरस्तादग्नमेव्यवाहुनायययथापूर्वं स्वस्विष्कृद स्वधे सस्तु स्वधेति
नाश्रुत प्रसा श्रुते स्वधानमइतिवषट्कारोमथमुहूर्त होताध्वर्यु ब्रह्माग्नीदवघ्राय
निदधाति प्राशित्र मवदापेडांवासर्वे प्राश्नंति वावेदिं त्रिः परिषिंचत्सुदपात्रेणाध्वर्यु
र्यजमानो वास्यक्तिषु पित्र्यवदेजनं परिषिंच्य पूर्ववदुत्तरा परस्यां प्रथमं सव्ये
समवदायसर्वेभ्योयथावनिक्त पिंडादरा स्ससावेततइसुत्तरपूर्वस्यां पाणीनि
मृष्टेत्र पितरइति यज्ञोपवीतिनः सर्वेनिष्क्रम्योदचोक्षंनमीमदंत्येसाहृयनायमु
पतिष्ठंतेद्वाभ्यां मनोन्वाह्वामह इति गार्हपत्यतिस्त्रिः प्राचीनावीति प्रविश्यामी
मदंतेतिराताजपत्स्यवनेज्यपूर्ववत्प्रदक्षिणंनिविविस्य स्पनमोव इत्यंजलिं
करोतिषड्भिनमस्कारान्तः हान्तः पितरोदत्तेतिचब्रह्मामंत्रणादि प्राक्सुग्भ्य ॥३२॥

हनात्रयाजवद्यज्ञोपवीतिविपर्यय पन्नस्तरमादत्तेनुप्रहरेत्युक्तेनकिंचनानुप्रह
रतितूष्णीमात्मानं स संस्रवं स्पृशत्सुपस्पृश्यापरिधीन्त्वानुप्रहरति शंयुंतं भवति बर्हिः
परिध्यग्नौ प्रास्यंति हविरुच्छिष्टं चाप्सु प्रास्यं वा ॥ ५ ॥ त्रैयंबकानि निर्वपति रौद्रानेक
कपालांन्यावंतोयजमानस्यगृह्या एककाधिकांश्चतुरेवोदङ्मुखः सर्वं देशाजुहोतयो
वषट्कारेणन कान्वापाभ्यां रुत्वादक्षिणाग्न्युल्मुकमादायचतुष्पथे पलाशपत्रमध्य
मेनहोमः सर्वेषामवदानं सकृत्सकृदति रिक्तवर्जमक्तेषु मिश्रणमेषत इतिजु
ति होसौ रिक्तमाखूत्करउपकिरत्येषत इत्यागम्याचरुद्रमदीमहीति जपस्यग्निं त्रिः
परियन्ति पितृवत्सव्योरूनाघ्नानास्त्र्यंबकमितिदेवत्ये तत्रैवदक्षिणानाघ्नानाः कु
मार्यश्चोत्तरेणोभयत्र पतिकाभग कामावारोद्धांन्यजमानोंजलिनोदस्यस्य गोःप्र

पणंप्रतिगृह्णात्यनेनानशक्य उपस्पर्शनंम्‌ तयोः रूत्यावेणुयष्ट्यां रूपेवास ज्यो
मयतस्याणुवक्षवंशावल्मीकानामन्यतमस्मिन्नु रक्षेपणवदासजस्येतत इ
तिवृत्तिवासाइत्यनपेक्षमेसोपस्पृशन्त्ययः॥१०॥शुनासीरीयमतोयदेष्टेत
पौर्णमासधर्मोबर्हिर्वर्जं निस्येष्योधिकानिशुनासीराभ्यांद्वादशकपालइंद्राय
वाशुनासीरायवायव्यंपयोलौकिकंप्रतिधुक्श्रुतेर्नोविरोधात्स्रक्तिदर्शना
च्चयवागूर्वासौर्यएककपालसीरंषड्‌गोगन्दक्षिणोप्ररौवाश्वेतोश्वंसौर्य
स्याभावेगौः संवत्सरे पूर्वोः फाल्गुन्युपवसथेसीरीयेणेष्ट्वासोमेनपशुनेष्ट्वावा
यजेतपौर्णमास्यामावृत्तिरनीजानस्यफाल्गुन्युपवसथेशुनासीरीयंप्रातर्वैश्व
देवंसपशुषुपशुतंत्रंप्राधान्यात्सर्वेषुवैश्वदेवेपाशुकंस्यद्योवावैश्वदेवः॥३३॥

पशुपुरोडाशमनुहवींषिनिर्वपतिनेषांस्विष्टकृद्वयस्यायथोक्तमविरुद्धं
हृदयाशूलांतेवपनंवरुणप्रघासेषुवरुणोमहाहविषिमहेन्द्रःशुनासीराभ्यांच
तुर्थःपुरस्ताद्वापणःपर्वणोंतेवा॥११॥मित्रविंदाश्रीराष्ट्रमित्रायुष्कामस्यदश
हविरग्नेयःसौम्यश्चरुर्वारुणोदशकपालश्चरुर्वायवोमैत्रश्चरुरैंद्रएकादश
कपालोबार्हस्पत्यश्चरुःसावित्रोद्वादशकपालोद्वाकपालोवापौष्णश्चरुःसारस्व
तश्चरुस्त्वाष्ट्रोदशकपालएकंप्रदानंसमस्यानुवाचनंयजेतिचप्रैषोत्तरेनिग
मायथेष्टंजैमिनिणाश्रुतेरनुलोमावागुणत्वात्संचदशसामिधेन्यःपुष्टिमंतावाज्य
भागावग्निनारयिमश्नवत्योषमेवदिवेदिवे॥यशसंवीरवत्तमं॥गयस्फानोअमी
वहावसुवित्पुष्टिवर्द्धनः॥सुमित्रःसोमनभवेतिहविषोनुवाक्याग्निःसोमोवरुणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री पूषा नो गोभिरवसा सरस्वती॥ त्वष्टा रूपा
णि समनक्तु यज्ञैरिति याज्या त्वष्टा रूपाणि ददती सरस्वती पूषा भगं सविता मे
ददातु॥ बृहस्पतिर्ददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सोमो अग्निरिति॥१२॥ हुत्वा
स्थाल्यास्रुवेणोपजुहोति॥ अग्निरन्नादोन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु
स्वाहा॥ सोमो राजा राजपती राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा॥ वरुणः सम्राट्
सम्राट्पतिः साम्राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा॥ मित्रः क्षत्रं क्षत्रपतिः क्ष
त्रमस्मिन्यज्ञे मयि दधातु स्वाहेन्द्रो बलं बलपतिर्बलमस्मिन्यज्ञे मयि दधातु स्वा०
बृहस्पतिर्ब्रह्म ब्रह्मपतिर्ब्रह्मवर्चसमस्मिन्यज्ञे मयि दधातु स्वाहा॥ सविता राष्ट्रं
राष्ट्रपती राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहा॥ पूषा भगं भगपतिर्भगमस्मिन्ये ॥३५॥
२॥

मयि दधातु स्वाहा॥ सरस्वती पुष्टिं पुष्टिपतिः पुष्टिमस्मिन्यज्ञे मयि दधातु स्वा
हा॥ त्वष्टा रूपाणां रूपस्य रूपपती रूपेण पशूनमस्मिन्यज्ञे मयि दधातु स्वाहेः
तयिराजौ संयाज्ये सहस्रवत्सौ वा न नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु॥ द्युम्न
दग्ने सुवीर्यं वर्षिष्ठमनुपक्षितं॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः॥ शन्नः
यामरुद्भ्यो ग्ने सहस्रसातमः इति दक्षिणा सहस्रं वा सहस्रं वा॥१३॥ इति
कात्यायनसूत्रे पंचमोध्यायः॥५॥ पश्चिज्यासंवत्सरे संवत्सरे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.09.19 10:57
,TRANSFERRED=2019/09/17 at 11:09:51
,PAGES=33
,TYPE=STD
,NAME=S0001866
,Book Name=M-651-KATYAYAN SUTRE PANCHMODHYAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection